# Shri Dattatreya Hridayam

# श्रीदत्तात्रेयहृदयम्

## Document Information

Text title : Shri Dattatreya Hridayam

File name : dattAtreyahRRidayam.itx

Category : dattAtreya, deities_misc, vAsudevAnanda-sarasvatI, hRidaya

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीदत्तात्रेयहृदयम्

प्रह्लाद एकदारण्यं पर्यटन्मृगयामिषात् ।
भाग्याद्ददर्श सह्याद्रौ कावेर्यां निद्रिता भुवि ॥ १॥

कर्माद्यैर्वर्णलिङ्गाद्यैरप्रतर्क्यं रजस्वलम् ।
नत्वा प्राहावधूतं तं निगूढामलतेजसम् ॥ २॥

कथं भोगीव धत्तेऽस्वः पीनां तनुमनुद्यमः ।
उद्योगात्स्वं ततो भोगो भोगात्पीना तनुर्भवेत् ॥ ३॥

शयानोऽनुद्यमोऽनीहो भवानिह तथाप्यसौ ।
पीना तनुं कथं सिद्धो भवान्वदतु चेत्क्षमम् ॥ ४॥

विद्वान्दक्षोऽपि चतुरश्चित्रप्रियकथो भवान् ।
दृष्ट्वापीह जनांश्चित्रकर्मणो वर्तते समः ॥ ५॥

इत्थं श्रीभगवांस्तेन प्रह्लादेनात्रिनन्दनः ।
सम्पृष्टः प्राह सन्तुष्टः कृपालुः प्रहसन्निव ॥ ६॥

श्रीनृसिंहोऽवतीर्णोऽत्र यदर्थं स त्वमेव हि ।
दैत्यजोऽपि मुनिच्छात्र शृणु भागवतोत्तम ॥ ७॥

मन्दः स्वज्ञो भ्रमंस्तृष्णानद्येमं लोकमागतः ।
कर्मयोगेन मुक्तिस्वर्मोहद्वारं यदृच्छया ॥ ८॥

निवृत्तोऽस्म्यत्र यततां व्यत्ययं वीक्ष्य शर्मणे ।
आत्मनोऽस्य सुखं रूपं क्लिष्टे नष्टे स्वयं प्रभम् ॥ ९॥

ज्ञात्वा संस्पर्शजान्भोगान्दुःखात्स्वप्स्यामि दैवभुक् ।
विस्मृत्यामुं जनः स्वार्थं सन्तं यात्युग्रसंसृतिम् ॥ १०॥

स्वार्थं मायावृतं त्यक्त्वा तदर्थ्यन्यत्र धावति ।
शैवालछन्नकं त्यक्त्वा यथाम्ब्वर्थी मरीचिकाम् ॥ ११॥

अभाग्यस्य क्रिया मोघाः सुखप्राप्त्यै प्रयोजिताः ।
तत्साफल्येऽप्यसद्धिः किं कार्यं मत्र्यस्य कृच्छ्रजैः ॥ १२॥

कामार्तेच्छोर्मोहशोकरागद्वेषश्रमादयः ।
यतोऽजितात्मनो नैति निद्रापि भयशङ्कया ॥ १३॥

प्राणार्थेच्छा हि मधुकृच्छिक्षितेन मयोज्झिता ।
राजार्थिहिंस्रचोरद्विड्कालेभ्यो न बिभेम्यतः ॥ १४॥

निरिच्छः परितुष्टात्मा यदृच्छालाभतोऽस्मि सन् ।
बहुकालं शये नो चेद्विद्वान् धैर्यान्महाहिवत् ॥ १५॥

भूर्यल्पं स्वादु वाऽस्वादु कदन्नं मानवर्जितम् ।
समानं क्वापि भुञ्जेऽह्नि निशि भुक्त्वापि वा न वा ॥ १६॥

हरत्यन्यः पतिं हत्वा कृच्छ्राप्तं मधुवद्धनम् ।
शिक्षितं मधुकृत्तोऽतो विरक्तोऽस्म्यपरिग्रहः ॥ १७॥

दैवाप्तं चर्म वल्कं वा वस्त्रं क्षौमं वसे न वा ।
क्वचिच्छयेऽश्मभस्मादौ कशिपौ वा जने वने ॥ १८॥

क्वचित्स्नातोऽलङ्कृतोऽहं स्रग्वी सुवसनो न वा ।
रथेभाश्वौश्वरे क्वापि मुनिवत्क्वापि मुग्धवत् ॥ १९॥

नाहं निन्दे न च स्तौमि स्वभावविषमं नरम् ।
एतेषां श्रेय आशास उतैकात्म्यमथात्मनि ॥ २०॥

ब्रह्मासक्तो ब्रह्मनिष्ठो ब्रह्मात्मा ब्रह्मधीरहम् ।
संस्कृते ब्राह्मणेऽन्त्ये वा समदृग्गवि शुन्यपि ॥ २१॥

समासमाभ्यां विषमसमे पूजात ओदनम् ।
नाद्यादित्यज्ञगृहिणो दोषो न समदृग्यतेः ॥ २२॥

स्वरूपेऽवासनस्तिष्ठाम्यान्वीक्षिक्याऽनया दिवि ।
योऽमुमिच्छेत्तु तस्यायमुपायो विदुषः सुखः ॥ २३॥

हुनेद्विकल्पं चित्तौ तां मनस्यर्थभ्रमे तु तत् ।
वैकारिके तं मायायां तां स्वस्मिन्विरमेत्ततः ॥ २४॥

शुद्धः सोऽहं परात्मैक इति दार्ढ्ये विमुच्यते ।
हृदयं मे सुगुप्तं ते प्रोक्तं तत्त्वं विचारय ॥ २५॥

इतीशेनोपदिष्टः स ज्ञात्वात्मानं प्रपूज्य च ।
तदाज्ञप्तो ययौ राज्यं कुर्वन्नपि स दैवभुक् ॥ २६॥

राज्यश्रीपुत्रदाराढ्योऽलिप्तः स्वात्मदृक्सदा ।
भुक्त्वारब्धं चिरं राज्यं दत्वा पुत्रे विरोचने ॥ २७॥

मुक्तसङ्गश्चचार क्ष्मां समदृक्स गुरूक्तवत् ॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं श्रीदत्तपुराणान्तर्गतं
श्रीदत्तात्रेयहृदयं सम्पूर्णम् ।

*Shri Dattatreya Hridayam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*